संस्कृत-वार्ता:

21/12/2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· राष्ट्रपतिना द्रौपदी मुर्मु-वर्यया विकसित भारत–ग्रामीण जीविका विधेयकम् अनुमोदितम्।

· प्रधानमन्त्री श्रीनरेन्द्र मोदी अद्य असमस्य नामरूप क्षेत्रे षट्-शताधिक-दश-सहस्र-कोटिकाधिकैः रूप्यकैः निर्मितस्य उर्वरकसंयन्त्रस्य आधारशिलां संस्थापितवान्।

· भारतेन स्पष्टीकृतं यत् नवदिल्लीस्थ बाङ्गलादेशस्य उच्चायोगस्य बहिः एकत्रितैः प्रदर्शनकारिभिः सुरक्षाव्यवस्था नैव भञ्जिता ।

· भारतीय विमानन प्राधिकरणेन सघन-कुज्झटिका-कारणेन विमानोड्डयनेषु विलम्बस्य परिवर्तनस्य च परामर्शः प्रख्यापितः अस्ति। यात्रिणः प्रत्यग्र-सूचना-प्राप्त्यर्थं प्रोक्ताः सन्ति।

· एमनेस्टी इंटरनेशनल समवायेन पाकिस्तानस्य पत्रकारस्य सोहराब बरकतस्य निगडने चिन्ता प्रकाशिता।

· दुबई-मध्ये "अंडर-19" इति ऊनविंशतिःवर्षा-भ्यान्तर्वर्तिनां पुरुषाणां एशिया-चषकीये अन्त्यचक्रीये द्वन्द्वे पाकिस्तानेन भारतं पराजितम्।

<u>राष्ट्रपतिः</u>

राष्ट्रपतिना द्रौपदी मुर्मु-वर्यया विकसित भारत–ग्रामीण जीविका विधेयकम् अनुमोदितम्। अधुना-ग्रामीण-परिवारेभ्यः पञ्च विंशत्युत्तर-एक-शत-मितानाम् दिनानां जीविकयाः समर्जनं निश्चप्रचं भविष्यति। एतद्धि मनरेगा योजनायाः स्थानं भजिष्यति।

प्रधानमन्त्री असम

प्रधानमन्त्री श्रीनरेन्द्र मोदी अद्य असमस्य नामरूप क्षेत्रे षट्-शताधिक-दश-सहस्र-कोटिकाधिकैः रूप्यकैः निर्मितस्य उर्वरकसंयन्त्रस्य आधारशिला संस्थापिता। अनेन संयन्त्रेण उर्वरकस्य आयाते निर्भरता न्यूनीभविष्यति। जीविकायाः पारेसहस्रं नूतनाः अवसराश्च सृजिताः भविष्यन्ति। अस्याः परियोजनायाः उद्देश्यः उर्वरक-उत्पादनस्य सुदृढीकरणं,वर्धनम् अपि च कृषि-क्षेत्रे वृद्धेः समर्थनं आसीत्। एतत् संयंत्रं प्रतिवर्षं सहस्राधिक-द्वादश-लक्ष-मीट्रिक-टनमितं रासायनिकम् उर्वरकं उत्पादयिष्यति। अस्मिन् अवसरे श्री मोदी उक्तवान् यत् एतत् संयंत्रं उर्वरक-आयातस्य उपरि भारतस्य निर्भरतां न्यूनीकरिष्यति अपि च वृत्तेरवसराणां सृजनं भविष्यति।

प्रधानमन्त्री उक्तवान् यत् पुरातन्याः निर्माणशालायाः प्रौद्योगिकी अप्रासंगिकता प्राप्ता। परञ्च काङ्ग्रेस प्रशासनेन अस्मिन् विषये ध्यानं न दत्तम्। अस्मात् कारणात् नामरुपस्य बहूनि संयंत्राणि पिहितानि जातानि। प्रधानमन्त्री उक्तवान् यत् द्विविधं इञ्जनयुतं प्रशासनं अधुना काङ्ग्रेस प्रशासनेन निर्मितानाम् समस्यानां समाधानं करोति इति।

श्री मोदिना उक्तं यत् चतुर्दशोत्तरद्विसहस्र तमे वर्षे सम्पूर्णे देशे केवलं पञ्चविंशत्यधिकद्विशतलक्षं मीट्रिकटनमितस्य रासायनिक उर्वरकस्य उत्पादनं भवति स्म । अपरत्र विगत-एकादशवर्षेषु परिश्रमस्य अनन्तरं एतत् उत्पादनं प्रायः षडोत्तर-त्रिशत-लक्ष-मीट्रिक-टनमितं यावत् वर्धितम् अस्ति ।

एमईए - बाङ्गलादेश

भारतेन स्पष्टीकृतं यत् नवदिल्लीस्थ बाङ्गलादेशस्य उच्चायोगस्य बहिः एकत्रितैः प्रदर्शनकारिभिः सुरक्षाव्यवस्था भञ्जनस्य सामर्थ्यं नैव कृतम्। मन्त्रालयेन एतदपि उक्तं यत् प्रदर्शनकारिभिः बाङ्गलादेशे अल्पसंख्याकानां सुरक्षायाः याचना कृता।

भारतीय-विमानपत्तन परामर्श

भारतीय-विमानपत्तन-प्राधिकरणेन भारतीय विमानन प्राधिकरणे सघन-कुज्झटिका-कारणेन विमानोड्डयनेषु विलम्बस्य परिवर्तनस्य च परामर्शः प्रख्यापितः अस्ति। यात्रिणः प्रत्यग्र-सूचना-प्राप्त्यर्थं च प्रोक्ताः सन्ति। ऋतु विज्ञान विभागेन दिल्ल्याः, उत्तर प्रदेशस्य , हरियाणायाः चंडीगढस्य च कतिपय भागेषु सघन-सघन-कुज्झटिकायाः सञ्चेतना पूर्वकं ऑरेंज अलर्ट इति नारङ्ग-सञ्चेतना प्रसारिता अस्ति। प्राधिकरणेन यात्रिणः परामृष्टाः यत्ते निज-विमानानां स्थिति-

विषये सम्बद्ध-विमान-समवायस्य आधिकारिक-माध्यमै: सूचनां स्वीकुर्युः अथ च विमान-पत्तनार्थं गमनसमये अतिरिक्त समयं स्वीकृत्य चलेयु:।

## पाकिस्तान प्रकरणम्

एमनेस्टी इंटरनेशनल समवायेन पाकिस्तानस्य पत्रकारस्य सोहराब बरकतस्य निगडने चिन्ता प्रकाशिता, य: खलु ऑनलाइन इति अन्तर्जालीय-आलोचनाया: आरोपे साइबर-सुरक्षा-विधि-नियमस्य अन्तर्गतं निगडीकृतः अस्ति। सोहराब बरकत: राज्य-संस्थानां ऑनलाइन आलोचनाया: आरोपे निगडित: अस्ति।

## शिवराज सिंह-जी-राम-जी

केन्द्रीय-कृषि-ग्रामीण-विकास-मन्त्री शिवराज सिंह चौहानः संसदि प्रावोचत् यत्-नवीनं विकसित-भारत-जी-राम-जी इत्याख्यं विधेयकं मनरेगा इति योजनायाः विशिष्टः विकास-चरणः अस्ति। अस्य उद्देश्यं विकासस्य निर्धनानां च पक्षे कार्याचरणम् अस्ति। एतस्य विधेयकस्य अन्तर्गतं ग्रामीण-परिवारेभ्यः प्रतिवर्षं पञ्चविंशत्युत्तर-एक-शतं दिनानां वार्षिक-जीविकायाः प्राप्तिः निश्चप्रचं भविष्यति, यद्धि मनरेगा इति योजनायाः शतं दिनानां तुलनायां वर्धितं वर्तते। अमुना प्रोक्तं यत् एतद् विधेयकं निर्धन-कल्याणार्थं ग्रामीण-विकासार्थं च महात्म-गान्धिनः विचारधारायाः अनुरूपम् अग्रेवर्धनस्य प्रयासः अस्ति। विशेषतश्च गान्धिनः "ग्रामस्य सम्पूर्ण-विकासः" इत्यस्य दृष्टिकोणे। शिवराज-सिंहेन एतदपि प्रोक्तं यत् सर्वकारः निर्धनानां हिते भूरि-कल्याण-योजनाः प्रचालयति। एषः नूतनः विधिरपि अस्यामेव दिशि एकः बृहत् पदक्षेपः वर्तते।

विकसित भारत गारंटी फोर रोजगार एंड अजीविका मिशन – ग्रामीण वीबी-जी-राम-जी इत्याख्यं विधेयकम् पारितम् अस्ति। एतस्य अन्तर्गतम् इदानीं ग्रामीण-परिवारेभ्यः पञ्चविंशत्युत्तर-एकशतं दिनानां श्रम-जीविका प्रदास्यते।

## रेलभाटकवर्धनघोषणा

रेल विभागेन घोषितम् अस्ति यत् दिसम्बर-षड्विंश्या: आरभ्य यात्रिणां भाटकं युक्तिसंगतं विधास्यन्ते। साधारण-श्रेण्यां पञ्चदशोत्तर-द्वि-शत किलोमीटर-पर्यन्ताया: यात्राया: कृते भाटकं नैव वर्धिष्यते। तदनन्तरं दूरताया: अनुरूपं प्रतिकिलोमीटरमितं भाटकं वर्धिष्यते। साधारण-श्रेण्यां

प्रतिकिलोमीटरमितम् एक-पणकम्, तत्रैव मेल-एक्सप्रेस-रेल-यानानां नॉन-एसी इति वातानुकूलन-रहितायां श्रेण्यां प्रति-किलोमीटर-मितम् पणकद्वयं वर्धिष्यते। वातानुकूलन-श्रेण्यामपि प्रति-किलोमीटर-मितम् पणकद्वयं भाटकं वर्धितमस्ति। रेल विभागेन स्पष्टीकृतम् अस्ति यत् उपनगरीय-सेवा-कृते मासिकोत्सवीय-कालार्थं च भाटकं नैव वर्धितम् अस्ति। अनेन भाटक-युक्तीकरणेन प्रवर्तमाने वर्षे प्रायः षट्-शत-कोटि-रूप्यकाणाम् अतिरिक्त-राजस्वार्जनस्य आशा विद्यते। रेल विभागेन एतदपि प्रतिपादितं यत् विगते एकस्मिन् दशके रेलमार्गपट्टिकासञ्जाले, परिचालने च बृहती विस्तृतिः जातास्ति अथ च सुरक्षा-व्यवस्थापूर्वकं रेल-सञ्चालनं सुदृढं कर्तुं मानव-संसाधनानि अपि वर्धितानि सन्ति।

## उपराष्ट्रपतिः सी.पी. राधाकृष्णन्

उपराष्ट्रपतिः सी.पी. राधाकृष्णन् उक्तवान् यत् ध्याने सकारात्मकस्य समावेशनस्य च समाजं निर्मातुं परिवर्तनस्य च शक्तिः वर्तते। अद्य हैदराबादनगरस्य कान्हा-शान्ति-वनम् इत्याख्ये स्थले द्वितीय-विश्वध्यान-दिवसमाधृत्य सः अब्रवीत् यत् हार्टफुलनेस मूवमेंट इति संस्था शान्ति-सौहार्द-आध्यात्मिक- कल्याणाय महत्त्वपूर्णं कार्यं कुर्वद् अस्ति। सः अवदत् यत् मुक्तं चेतनं च मनः लोकसेवायां समाजे च सकारात्मकं परिवर्तनं कर्तुं शक्नोति। डॉ. राधाकृष्णन् उक्तवान् यत् ध्यानम् भारतस्य प्राचीनस्य आध्यात्मिकपरम्परायाः भागः अस्ति यत् मनसः चेतनायाः च विज्ञानं वर्तते।

## केन्द्रीयगृह-मंत्रालयः-अग्निवीर आरक्षणम्

केन्द्रीय गृह-मंत्रालयेन सीमा-सुरक्षा-बले भटानां नियुक्तिकृते पूर्व अग्निवीराणाम् आरक्षणं प्रतिशतं दश-मिताद् संवर्ध्य प्रतिशतं पञ्चाशत् मितं कृतम् अस्ति। अधिसूचनायाः अनुसारेण प्रथम-गुल्मस्य पूर्व अग्निवीराणां अधिकतम आयु सीमासु अपि पञ्च-वर्षाणां शैथिल्यं प्रदास्यते,तत्रैव अन्य पूर्व-अग्निवीरेभ्यः वर्षत्रयस्य शैथिल्यं प्रदास्यते। अनेन सममेव पूर्व अग्निवीरेभ्यः शारीरिक-मानक-परीक्षणे शारीरिक-दक्षता परीक्षणे अपि शैथिल्यं प्रदास्यते।

क्रिकेट वार्त्तायां

दुबई-मध्ये "अंडर-19" इति ऊनविंशतिःवर्षा-भ्यान्तर्वर्तिनां पुरुषाणां एशिया-चषकीये अन्त्यचक्रीये द्वन्द्वे पाकिस्तानेन भारतं पराजितम्। धेयं अस्ति यत् पाकिस्तानेन प्रदत्तम् अष्टचत्वारिंशदुत्तर-त्रिशत-मितानां धावनांकानां लक्ष्यम् अनुसरद् भारतीयं दलं षट् पंचाशदुत्तर एकशतं धावनांकेषु एव बहिर्भूतम्।

।। इति वार्ताः ।।